# Sanakadikakritah Shri Hari Stuti

# सनकादिककृताः श्रीहरिस्तुतिः

## Document Information

Text title : Sanakadikakritah Shri Hari Stuti

File name : sanakAdikakRRitAHshrIharistutiH.itx

Category : vishhnu, svAminArAyaNa, krishna, stuti, aShTaka

Location : doc_vishhnu

Acknowledge-Permission: Swaminarayan Sampradaya

Latest update : August 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 9, 2024

*sanskritdocuments.org*

# सनकादिककृताः श्रीहरिस्तुतिः

(वसन्ततिलकम्)
स्वामिन् हरेऽक्षरपते कमनीयमूर्ते
आनन्दकन्द निगमागमगीतकीर्ते ।
नैकाण्डनायक विभो गुणवारिराशे
वन्दामहे परमहंसगतिं मुहुस्त्वाम् ॥ १॥

त्वं वै परात्परतरे परमे स्वकीये
धाम्न्यक्षरे परमसौख्यमहापयोधे ।
संसेवितः परममुक्तगणैः सदैव
संराजसे परमपूज्यपदारविन्दः ॥ २॥

दिव्याद्भुतानवधिकातिशयस्वसिद्ध-
सौशील्यकारुणिकतादिगुणैकधामन् ।
आत्यन्तिकीं ननु विमुक्तिमिह प्रदातुं
नृभ्यस्त्वया नटवद् धृतमस्ति नाट्यम् ॥ ३॥

त्वत्तः प्रभो परममैश्वरमाप्य सर्वे
श्रीवासुदेवरघुनन्दनदत्तमुख्याः ।
आदेशतो ह्यवतरा भगवंस्तवैव
क्षोणीतले प्रतियुगं किल सम्भवन्ति ॥ ४॥

ये ते वदन्ति सकलावतरैकहेतोः
साम्यं च तैरवतरैः प्रकटप्रताप ।
जानन्ति मन्दमतयो न हि तेऽवतारिन्
सर्वेश्वरस्य कि
त्वामेव नाथ सततं फणिनायकाद्या
व्यासादयो मुनिवराश्च पुराणदक्षाः ।
गायन्ति ते चरणपद्मसुसक्तचित्ता-

श्चैवं भवो हरिरजश्च सुराः समस्ताः ॥ ६॥

स्वामिन्नपरमहिमँस्तव सन्महिम्नः
पारं न यान्ति निखिला अपि चाक्षराद्याः ।
व्योम्नो यथा गरुडमुख्यपतत्त्रयश्च
नक्रादयश्च जलजा जलधेर्यथैवम् ॥ ७॥

साक्षात्त्वदीयपरमेक्षणतः प्रमोदं
प्राप्ताः स्वतन्त्र कृतकृत्यतमाश्च जाताः ।
धर्मात्मज स्वशरणागतवत्सलेश
वन्दाम मुनिपतिं पुरुषोत्तमं त्वाम् ॥ ८॥

इति श्रीस्वामिनारायणबापाचरित्रामृतसागरे प्रथमप्रवाहे
चतुर्विंशतितमे तरङ्गे सनकादिककृताः श्रीहरिस्तुतिः सम्पूर्णा ।

*Sanakadikakritah Shri Hari Stuti*
pdf was typeset on August 9, 2024

Please send corrections to *sanskrit@cheerful.com*